Acc. No. ~~835.~~ M-1522
Title- वज्रसूचिउपनिषत्
Author - अश्वघोष
Date - ?
Sub - उपनिषत्
folio - 6
Xerox - 11

1

व॰ ॥

श्रीगणेशाय नमः ॥ वज्रसुचिं प्रवक्ष्यामि शास्त्रमज्ञानभेदनं ॥ दूषणं ज्ञान
हीनानां भूषणं ज्ञानचक्षुषां ॥ ब्राह्मणक्षत्रियवैश्यशूद्रा श्चत्वारो वर्णा
स्तेषां वर्णानां ब्राह्मणः प्रधानः ॥ इति वेदवचनाभिरूपं स्मृतिभिरप्युक्त
कं तत्राचोद्यमस्ति तेषां वर्णानां को वा ब्राह्मणो नाम ॥ किं जीवः ॥ किं देहः
किं जातिः किं धर्मः ॥ किं कर्म ॥ किं वर्णः ॥ किं पांडित्यं ॥ किं ज्ञानं ॥ प्रथमं
जीवो ब्राह्मण इति चेत् ॥ तर्हि सर्वस्यापि जनस्य जीवस्यैकरूपत्वात् ॥
जीवो ब्राह्मणो न भवत्येव ॥ अन्यच्च देहो ब्राह्मण इति चेत् ॥ तर्हि ॥ चांडालां
लानां मनुष्याणां देहस्य जरामरणाधर्मदर्शनत्वात् ॥ देहो ब्राह्मणो न ॥ राम ॥

भवत्येव । पुनर्देहो ब्राह्मण इति चेत् । तर्हि । पितृमातृशरीरदहनात् पु
त्राणां ब्रह्महत्यादि संभवात् । देहो ब्राह्मण न भवत्येव । अन्यच्च जात्या
ब्राह्मण इति चेत् । तर्हि अन्य जात्यास मुद्भवा महर्षयो बहवः संति ।
ऋषि शृंगो मृग्यां । कौशिकः कुशामास्तर्यां । वाल्मिको वाल्मिक्यां । व्यासः
कैवर्तकन्यायां । वसिष्ठो वेश्यायां । विश्वामित्रः क्षत्रियायां । अगस्तिः
कुंभे । जांबुको जांबुक्यां । इति जातिविस्तरेन । तस्मा ज्जात्या ब्राह्मण न
भवत्येव । अन्यच्च धार्मिको ब्राह्मण इति चेत् । तर्हि ब्राह्मण क्षत्रिय
वैश्य शूद्रादयोपि । कन्यादान गोदान गजदान पृथिवीदान हिरण्याश्व

3

व॰
।२।

महिषीदासीदारकास्ते बहवः संति॥ तस्माद्धार्मिको ब्राह्मणो न भवत्येव अन्यच्च धार्मिको ब्राह्मण इति चेत्॥ तर्हि ब्राह्मणक्षत्रियवैश्यशूद्रादयोपि इष्टापूर्तादिकर्मकारिणो बहवः संति तस्मात् धार्मिको ब्राह्मणो न भवत्येव॥ अन्यच्च वर्णो ब्राह्मण इति चेत्॥ तर्हि॥ ब्राह्मणः श्वेतवर्णः॥ क्षत्रियो रक्तवर्णः वैश्यो पीतवर्णः॥ शूद्रः कृष्णवर्णः इति नियमाभावात्॥ तस्माद्वर्णो ब्राह्मणो न भवत्येव॥ अन्यच्च पांडित्यो ब्राह्मण इति चेत्॥ तर्हि ब्राह्मणक्षत्रियवैश्यशूद्रादयोपि पदवाक्यप्रमाणविज्ञाना बहवः संति॥ तस्मात् पांडित्यो ब्राह्मणो न भवत्येव॥ त

राम
।२।

वं
॥३॥

तिरुहवनचनादेवमोक्षः ॥ केचिद्वदंति सावयववस्तुज्ञानमोक्षः ॥ केचिद्व
दंति निरावयवगुणातीतवस्तुज्ञानमोक्षः ॥ केचिद्वदंति स्वसिद्धांतक
थितो मोक्षः ॥ केचिद्व्यापकसकलागमशास्त्रार्थनिर्दिष्टाचारकर
णादेव मोक्षः ॥ केचिद्दीक्षासाचारमनानाचारविवर्जितक्रीडालीलां
शाश्वितमानंदमयोमोक्षः ॥ केचिद्द्वयाद्वयपरमयज्ञानमोक्षः ॥ के
चित्सोहमस्मीति समरसतत्वमोक्षः ॥ केचित्काष्ठिमूर्तेपरसतत्वेल
यंगतमोक्षः ॥ केचिज्जटास्थापनभस्मधूलनमौनांगिकारादेव
मोक्षः ॥ केचिन्नानातीर्थयात्राजपहवनदानव्रतैरेवमोक्षः ॥ केचित्स्था

राम
॥३॥

वर जंगमजातिहिंसाकेशोत्पाटनाभ्यां स्यादेव मोक्षः॥ एतेषां संकल्पवि
कल्पानुसारदर्शनभेदाबहवः संति॥ तर्हि॥ न भवति मोक्षपदं सर्वेषांम
ति: [illegible]लौकिकः॥ वेदांतां कुजतर्क कुतर्कमतिग्रस्ताः परमात्मयाभद्राः॥ के
मेव ला कुलहतधियो चर्दूताद्भूतानि वैशेषिकाः॥ अन्येभेदरतानि
नाद विकल्पास्ते तत्त्वतो वंचिता तस्मात्सिद्धमतं स्वभावसमयधीरं
परं संश्रीयं॥ सांख्या वैष्णवा वैदिका विधिपरा संन्यासिनः स्नातकाः
सोमसिद्धपराः प्रपंचनिरता बौधा जिनाः श्रावकाः॥ एते कृत्रिरताः
क्रियापरिगतास्ते तत्त्ववंचिता तस्मात्॥ भ शैवाः पाशुपता महाव्रतध
राः कालमुखा जंगमाः शाक्ताः कौलिकाः कुलार्चनरताः॥ कापालिकाः

व॰
॥८॥

शांभवाः॥ यया कृत्यनिरतास्तित्तत्वतोवंचिताः तस्मात्॥ ३॥ त्र्याचार्य्या बहुदी
क्षिता धृतरतानशास्त्रताः तापसानानातीर्थाश्रिसेवकाजपसया मौन
स्थिता नित्यमाः॥ एते सर्वे स्फुरखदुःखभारनिरतास्ते तत्वतोवंचिताः त
स्मात्॥ ४॥ चार्वाकाः चतुराः स्वधर्मनिपुणाः॥ एते सर्वे स्फुरखदुःखभार
रतास्ते तत्वतोवंचिताः तस्मात्केचितुराः स्वधर्मनिपुणां देहात्मवा
दरताः सर्वे नेचितरन्विवेकविवरं येतत्परं सात्विकं॥ कश्चीरः प्रभवं
तिचैयवनाः पापरतानिर्दयास्तेषांमल्पमिहैकमेवहिफलं स
त्यान्नमोक्षः परं॥ ५॥ श्रीति॥ इदानीं महावाक्यविवरणेनोक्तं समष्टी
वेष्टी रूपप्रपंचं ततवाक्यसबळवाच्यांनापरिक्षितं स्थूलसूक्ष्मांगमंगी

राम
॥८॥

कृतंजीवपरमात्मैक्यमनुबोधं कथ्यते यमनियमसाधनसंपन्ननाना
समाधिकारिणं अनुयाय॥ अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहा
यमं च नियमः तत्पद त्वंपदश्चेतिपदद्वयमस्ति॥ तत्पद त्वंपदस्य वाच्या
र्थलक्ष्यार्थलक्षणं कथ्यते॥ तत्पदस्य वाच्योर्थः सकळजगदुत्पत्तिस्थि
तिलयकारणरूपसर्वज्ञसेश्वरशक्तिमान्॥ सर्वकामप्रदाश्चपरोक्ष
एसमुत्वर्त्तमाने भवति॥ सत्यंज्ञानमानंदेति इति यं स्वरूपचैतन्यमयंत
त्पदस्यलक्षणं॥ अथ त्वंपदस्य लक्षणं कथ्यते॥ श्रोत्रत्वक्चक्षु
र्जिह्वाघ्राणाइतिबुद्धींद्रियरहितः॥ प्राणापानव्यानोदानसमाननामा

व
॥५॥

कूर्म कृकलदेवदत्तधनंजय इति दशवायुरहितः मनोबुद्धिचित्तअहंकार
इति अंतःकरणचतुष्टयरहितः ॥ अन्नमयप्राणमयमनोमयविज्ञा
नमय आनंदमय इति पंचकोशरहितः ॥ आधिदैविकं आधिभौतिकं
आध्यात्मिकं तापत्रय सत्वरजतमगुणत्रयरहितः ॥ पुत्रैषणावित्तै
षणा लोकैषणा इति एषणात्रयरहितः ॥ एवं नततमकं चैतन्यं तत्सत्य
ज्ञानानंतानंदाद्वितीयं चैतन्यमेनं ॥ एतद्वाहं सत्यं ज्ञानमनंतं ब्र
ह्मेति श्रुतेरिति सत्यमित्यक ब्रह्मलक्षणं संति ॥ किमर्थमिति प्रश्ने सद्गुरुरा
ह। सत्शब्देन ईश्वर उच्यते ज्ञानशब्देन ज्ञप्तिरुच्यते ॥ आनंतशब्देन राम
॥५॥

८

अखंडैकरूपोच्यते। ब्रह्मत्वेन परिपूर्ण उच्यते। एवमेव सर्वद्वितीयचैत
न्यब्रह्म तत्त्वमसी ब्रह्माहमस्मि। अहं ब्रह्मास्मि एतेषां ज्ञानाद्विनापि
सम्यक् ज्ञानविशेषते इति कृतकाम ब्लमिवत्तस्योक्षेण कृतार्थ
कामरागद्वेषादिनामदमादिरहितः संतोषभाक्॥ मात्सर्यतृष्णासं
मोहादिनिवर्तते स एव ब्राह्मणोच्यते तथाहि॥ जन्मना जायते शूद्रो
व्रतबंधाद्द्विजोत्तमः॥ वेदाभ्यासैर्भवेद्विप्रो ब्रह्मजानातीति ब्राह्मणः
॥ ब्रह्मविदेव ब्राह्मणोच्यते कृतकृत्यो भवति॥ इत्यादिश्रुतिभिरव
निश्चय॥ सच्चीवनमुक्तः॥ इति श्रीवज्रसूचिउपनिषत् संपूर्णं समाप्तं॥